संस्कृत

याज्ञिक-प्रयोग-
स्मार्त

क्र.नं. १६४ वृद्धिश्राद्धम्

त्र्यंबक शंकर

(२)

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशाय नमः ॥ तत्रादौ तीर्थप्रशंसा ॥ दानं दद्यात्कु
रुक्षेत्रे गंगायां देहमुत्सृजेत् ॥ रेवातीरे तपः कुर्यात्त्र्यं
गौतमीतटे ॥ स्नातु स्त्रियश्च पुरुषाः पितृमातृकुलोद्
वाः ॥ गोदायां स्नानमात्रेण मुक्ताः एव न संशयः ॥ षष्टिर्वर्ष
सहस्राणि भागीरथ्यावगाहनं ॥ सकृद्गोदावरीस्नानं सिं
हस्थे च बृहस्पतौ ॥ तु विशेषकं ॥ अनेन गोदास्नानं श्रे
ष्ठतमं ॥ तीर्थे स्नाने सर्वेषामप्यधिकारः ॥ तदुक्तं भारते ॥ ब्रा
ह्मणः क्षत्रियो वैश्यो शूद्रो वा राजसत्तमः ॥ न वियोनिं व्र
जंत्येते स्नाता तीर्थे महात्मनः ॥ यात्राविधिस्तु स्कांदे ॥ ती

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

२

र्थयात्रां चिकीर्षुश्च प्राक्कृत्वोपोषणं गृहे॥ गणेशं च पि
१ तॄन्विप्रान्साधूंश्च शक्तितः॥ संपूज्य च कृतपारणको हृष्टो ग
च्छेन्नियमधृक्पुनः॥ आगत्याभ्यर्चयन्पितॄन्यथोक्त
फलभाग्भवेत्॥ गौडनिबंधे गौतमः॥ तीर्थयात्रासमारंभे
तीर्थात्प्रयागमेऽपि च॥ वृद्धिश्राद्धं प्रकुर्वीत बहुसर्पिः समन्वि
तं॥ स्नानं सवासं संतीर्थे मुंडनं तदनंतरं॥ ततः स्नानोप १
वासादि पश्चाच्छ्राद्धसमाचरेत्॥ काशीखंडे॥ यदह्नि तु ती
र्थप्राप्तिः स्यात्तदहः पूर्ववासरे निकल्पनादेव ऊपवासः
प्रकर्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत्॥ उपवासः पूर्वोत्तरखोतावि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

2A

कल्पः ॥ देवलः ॥ मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥
वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयां ॥ स्मृत्यंतरे ॥
ऊर्ध्वमब्दाद्द्विमासोना पुनस्तीर्थं व्रजेद्यदि ॥ मुंडनं चोप
वासं तु ततो यत्नेन कार्यते ॥ तज्जीवत्पितृकेणापि तीर्थे
कार्यं स्मृत्यंतरे ॥ विना तीर्थं विना यज्ञं मातापित्रोर्मृतिं
विना ॥ यो वापयति लोमानि स पुत्रः पितृघातकः ॥ मैत्रा
यणीयपरिशिष्टे ॥ उद्वाहे पुत्रजनने पित्रेष्ट्यां सौमके म
खे ॥ तीर्थे ब्राह्मण आयाते षडैते जीवतः पितुः ॥ महानदीषु
र्थे सर्वासु तीषु च गयां मृते ॥ जीवत्पितापि कुर्वीत श्राद्धं पार्वण

३ धर्मवत्त्या वृद्धौ तीर्थे च सन्न्यस्ते ताले च पतिते सति। एभ्य एव
२ पितादद्यात्तेभ्यो दद्यात्स्वयं सुत इति॥ तीर्थवासिनामप्यु
पवासादिकं कार्यं। तदुक्तं स्कांदे। तीर्थे चोपवासश्च गौतम्यां सिं
हगे गुरौ॥ कन्यागते तु कृष्णायां न तु तत्तीरवासिनां॥ ती
रवासिनां तपस्वीनां मुनीनामित्यर्थः। अन्येषां व्यव
सायीनां तीरवासिनां मुंडनादिकं पर्वविशेषे नि
त्यमस्तीति हतपापत्वात्॥ तदुक्तं। अन्यक्षेत्रे कृतं पापं पु
ण्यक्षेत्रे विनश्यति। पुण्यक्षेत्रे कृतं पापं वज्रलेपो २

३८ भविष्यति ॥ यस्मिंतीर्थे कृतंपापं तस्मिन्नेव विनश्यति ।
तीर्थांतरे तीर्थे कृतंपापं नैव विमुच्यते इति स्मरणात् ॥ ती
र्थश्राद्धे विशेषः पाद्मे तीर्थे श्राद्धं प्रकुर्वीत पक्वान्नेन वि
शेषतः ॥ आमान्नेन हिरण्येन कंदमूलफलैरपि ॥ अर्घ्यमा
वाहनं चैव द्विजांगुष्ठनिवेशनं ॥ विकिरं तृप्तिप्रश्नं च तीर्थे
पंच विवर्जयेदिति भविष्ये ॥ अग्नौकरणं न चेति रत्नाव
ल्यां ॥ तीर्थे ब्राह्मणनिमंत्रणे विशेषः ॥ पृथ्वीचंद्रोदये म
नुः ॥ न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित् ॥ पि

२

त्रै कर्मणि संप्राप्ते पारक्षेत्र भयान्वितः हेमाद्रौ व्यासः । गाय
त्री सारमात्रोपि वरं विप्रः सुयंत्रितः । नायंत्रितश्चतुर्वेदी
सर्वाशी सर्वविक्रयी ॥ काणा कुंठी च कुब्जश्च दंती रुद्रो
व्याधितो जडः ॥ सर्वे [illegible] ये त्र व्यामिश्रिता वद्पा
रोगैरिति ॥ स्मृत्यंतरे ॥ तीर्थेषु ब्राह्मणं नैव परीक्षेत परिक्षेत
कदाचन ॥ अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवीत् ॥
स्कांदेपि । ब्राह्मणान्न परीक्षेत तीर्थे क्षेत्रनिवासिनः ॥
तेषु तुष्टेषु संतुष्टाः पितृभिः सह देवता इति । प्रमाणः ॥ छ ३

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com